International Journal of Sanskrit Research 2021; 7(2): 19-20

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(2): 19-20
© 2021 IJSR
www.anantaajournal.com
Received: 20-01-2021
Accepted: 23-02-2021

**Sukanya Senapati**
Lecturer, Department of Sanskrit, Christ College, Cuttack, Odisha, India

**Corresponding Author:**
**Sukanya Senapati**
Lecturer, Department of Sanskrit, Christ College, Cuttack, Odisha, India

# विभाषाशब्दस्य ऐतिहासिकमध्ययनम्

**Sukanya Senapati**

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i2a.1365

**सारांश**
व्याकरणशास्त्रस्य विकाशोऽष्टाध्याय्याः पूर्वमपि सर्वतो भावेन आसीत्।अष्टाध्याय्यां प्रयुक्ताः बहवः शब्दा आचार्यैः पूर्वमपि स्वग्रन्थेषु तेष्वेवार्थेषु तद्भिन्नेषु चार्थेषूक्ता इति दृश्यन्ते। काश्चन पाणिनीयसंज्ञाः या वर्तन्ते तादृशेषु संज्ञाशब्देषु विभाषासंज्ञा अत्र विचारणीया भवति।'न वेति विभाषा' इत्यष्टाध्याय्याम्।विभाषाशब्दः न अव्ययमित्येकं मतम्।।सामान्यतः विकृता भाषा विभाषा इत्याशयेन केचन आधुनिकाः विद्वांसः प्रचक्षन्ते।प्रातिशाख्ये विभाषाशब्दः विकल्पवाची एव।पाणिनिना तादृशाः बहवः शब्दाः प्रयुक्ताः ये व्याकरणशास्त्रे पारिभाषिकत्वेन लौकिकार्थबोधकत्वेन चोपलभ्यन्ते।

**कूटशब्दाः-** अष्टाध्यायी, विभाषा, अव्ययम्, संज्ञाशब्दाः, व्याकरणशास्त्रम् ।

## प्रस्तावना
लोकव्यवहारान्तर्गतानामकृत्रिमाणां शब्दानां शास्त्रे संज्ञात्वेन व्यवहारात्तेषां लोकशास्त्रोभयव्यवहारविषयत्वमस्ति। परन्तु कृत्रिमसंज्ञानां शास्त्रैकव्यवहारविषयत्वमिति परस्परं तयोर्भेदो विज्ञातुं शक्यः। तत्र काश्चन पाणिनीयसंज्ञाः तथा वर्तन्ते यास्तावत् लोके व्यवह्रियमाणा अपि सामान्यतः भिन्नस्वरूपाः भिन्नार्थबोधकाः वा सन्ति।

महर्षिपाणिनीयाष्टाध्याय्यां प्रयुक्ताः बहवः शब्दाः पूर्वैराचार्यैरेव विभिन्नेषु ग्रन्थेषु प्रयुक्ताः आसन्।तेषु शब्देषु केचन शब्दाः तेष्वेवार्थेषु पाणिनिनापि प्रयुक्ताः केचन तद्भिन्नेष्वर्थेष्वष्टाध्याय्यां प्रयुक्ताः दृश्यन्ते। अष्टाध्याय्याः पूर्वमपि व्याकरणशास्त्रस्य विकाशः सर्वतो भावेन आसीत्।अत एव स्वग्रन्थे पाणिनिः तदा तदा तेषां तेषामाचार्याणां नामानि उच्चारयामास [1] । पाणिनिव्याकरणे प्रयुक्तेषु विभिन्नेषु संज्ञाशब्देषु केचन शब्दाः पूर्ववत् प्रयुक्ताः [2] । केचन पाणिन्यभिमतेष्वेवार्थेषु प्रयुक्ताः।तादृशेषु संज्ञाशब्देषु विभाषासंज्ञा अत्र विचारणीया भवति।

विभाषाशब्दस्य प्रयोगः संस्कृतवाङ्मये पूर्वमपि प्रयुक्तः। सामान्यतः विकृता भाषा विभाषा इत्याशयेन केचन आधुनिकाः विद्वांसः जनसामान्यस्य भाषां विभाषां प्रचक्षन्ते। परन्तु संस्कृतसाहित्ये विभाषाशब्दः विकल्पार्थे प्रयुक्तः दृश्यते।वायुपुराणे 'वि'उपसर्गपूर्वकः 'भाष्' धातुः कर्मणि प्रयुक्तः।तथा हि- 'तस्मात् विवस्वान् मार्तण्डः पुराणज्ञैर्विभाष्यते' [3] अर्थात् विवस्वान् 'मार्तण्ड' शब्देनापि पुराणतत्त्वज्ञैर्व्यवह्रियते।तस्मात् विवस्वान् विकल्पेन मार्तण्डशब्दवाच्योऽपि भवतीति फलितार्थः। तैत्तिरीयप्रातिशाख्येऽपि 'वेति वैभाषिक' [4] इति सूत्रं दृश्यते।तत्र पदक्रमसदनभाष्ये 'वा शब्दो विभाषायां भवति, यत्र यत्र वा शब्दः श्रूयते तत्र तत्र विभाषायामिति वेदितव्यम्' इत्युक्तम्।तस्मात् प्रातिशाख्येऽपि विभाषाशब्दः विकल्पवाची एव। स्कन्दपुराणस्य

1) लोपः शाकल्यस्य, पा.अ. 8.3.19
ऋतो भारद्वाजस्य, पा.अ. 7.2.63
2) समाससंज्ञा, कारकसंज्ञाप्रभृतयः
3) वा.पु. उत्तरार्द्धम्, 23-29, पृ.141
4) तै.प्रा. 22-7

प्रभासक्षेत्रमाहात्म्यवर्णने तत्रत्यानां स्त्रीणां विषये एवमुक्तम्- 'देशभाषाविभाषिण्यो रामामण्डलमध्यत'[5] इति। अत्र दृश्यमानः 'वि' उपसर्गपूर्वको 'भाष्' धातुः न विकल्पबोधक अपि तु वचनपरक एव। अर्थात् देशभाषां वदन्त्यः ताः स्त्रियः आसन्निति। अत्र देशभाषाशब्दसाहचर्यात् व्युपसर्गपूर्वको 'भाष्' धातुः साधारणजनस्य व्यावहारिकी भाषा इति वक्तुं न शक्यते।यतो ह्यत्र व्युपसर्गपूर्वको भाष् धातुः भाषणमात्रार्थकः, न तु तादृशार्थकः।तस्मिन्नेव स्कन्दपुराणे कथायाः विशेषणत्वेन 'विभाषाभूषिता' इत्येतादृशः शब्दः प्रयुक्तः दृश्यते [6]। परन्तु तत्र कस्मिन्नर्थे विभाषाशब्दः प्रयुक्त इति निर्णेतुं न शक्यते। अथाप्ययं विभाषाशब्दः न विकल्पवाचीति वक्तुं शक्यम्। भरतमुनिप्रणीते नाट्यशास्त्रेऽपि विभाषाशब्दः दृश्यते [7]। परन्तु तत्र विभाषाशब्दः आरण्यकानामाभीराणाञ्च व्यावहारिकभाषायाः बोधकः वर्तते। आपिशलिः अपि स्वव्याकरणग्रन्थे विकल्पार्थे विभाषाशब्दस्य प्रयोगं कृतवान्निति 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इति सूत्रवृत्तेः काशिकायाः टीकायां पदमञ्जर्यां लिखितम् [8]। परन्तु पाणिनिकृतस्य शब्दानुशासनस्य साधुशब्दान्वाख्यानपरकत्वेन तत्र तादृशः अपभ्रंशशब्दः न विचार्यते।अतः पाणिनेः विभाषाशब्दः विशिष्टार्थपरकः। स च वक्ष्यते [9]।

विभाषाशब्दः न अव्ययमित्येकं मतम्।यतो हि 'विभाषया विभाषायां वा' इत्येतेषां विभिन्नविभक्तिकानां शब्दानां व्यवहारः दृश्यते। अयमेव विषयः सिद्धान्तकौमुद्याः बालमनोरमाख्यायां टीकायां स्पष्टीकृतः - 'विभाषाशब्दस्त्वव्ययमिति न भ्रमितव्यम्, न वेति विभाषायामिति भाष्यप्रयोगात्'। विभाष्यते विकल्प्येन इति विभाषा, 'गुरोश्च हलः' इत्यप्रत्ययः [10]।' परन्तु यथा मन्त्रे काठके छन्दसि संज्ञायां –इत्येतादृशाः शब्दाः प्रयुक्ताः तद्वत् विभाषायामिति सूत्रकारेण कुत्रापि कुतो नोक्तम् **?** तस्मात् ज्ञायते विभाषाशब्दः विशेषरूपायाः भाषायाः बोधको न भवति। विभाषापदघटितानामष्टाध्यायीसूत्राणां पर्यवेक्षणेन एतज्ज्ञायते यत् कुत्रापि विभाषाशब्दस्य विभक्त्यन्तरे प्रयोगो न दृश्यते यद्यपि भाष्ये विभाषायामिति प्रयोगोऽस्ति।गणरत्नाकरस्य मते विभाषाशब्दः अव्ययं भवति [11]। पाणिनिप्रमाणत्वेन स्वीकृत्य एतत् प्रत्येतुं शक्यते यत् विभाषाशब्दः अव्ययम्।

पाणिनिना तादृशाः बहवः शब्दाः प्रयुक्ताः ये व्याकरणशास्त्रे पारिभाषिकत्वेन लौकिकार्थबोधकत्वेन चोपलभ्यन्ते।यथा गुणशब्दः पाणिनिना पारिभाषिकत्वेन 'आद् गुण'[12] इत्यादिषु सूत्रेषु व्यवहृतः। परन्तु 'वोतो गुणवचनात्' [13] 'विभाषा गुणेऽस्त्रियाम्' [14] इत्यादिषु गुणशब्दः लोकप्रसिद्धगुणबोधकः। एवमेव अभ्यासशब्दः स्वाङ्गशब्दः सम्बुद्धिशब्दः नदीशब्दः युवशब्दः उपपदशब्दश्च उभयार्थे प्रयुक्तः।

विभाषापदघटितेन सूत्रेण निष्पद्यमानं रूपं सर्वथा वैकल्पिकं भवति।अस्यामालोचनायां विभाषाशब्दस्य पारिभाषिकत्वं लौकिकार्थबोधकत्वञ्च ऐतिहासिकग्रन्थानावलम्बनेन विचारितम्।विभाषा वा अन्यतरस्यामिति पदघटितेभ्यः सूत्रेभ्यो निष्पन्नाः शब्दा अवश्यमेव शुद्धवैकल्पिकाः भवन्तीति वक्तुमशक्यम्।सम्भवतस्तत्राचार्यनियमनं स्थितम्।परन्तु तस्य नियमनस्याव्यवहार्यत्वात् पाणिनिना तेषामाचार्याणां नामोल्लेखो न क्रियते यतः तस्मिन् समये सः नियमोऽव्यवहार्यः भवेत्।

### सन्दर्भ


1. पुराणविमर्शः- आचार्य-बलदेवोपाध्याय-विरचित, चौखम्बा विद्याभवन, वाराणसी। 2013
2. वैयाकरणसिद्धान्तकौमुदी-भट्टोजिदीक्षितविरचिता, बालमनोरमा-तत्त्वबोधिनी-सम्बलिता, मोतिलाल-बनारसीदास।
3. संस्कृत शास्त्रों का इतिहास-आचार्य वलदेव उपाध्याय, नवीन संस्करण, शारदा संस्थान, वाराणसी 1988.
4. Technical terms and technique of Sanskrit grammar- K.C. Chatterjee, Second edition, University of Calcutta 1964.


---

5) स्क.पु. प्रभासक्षेत्रमाहात्म्यम् 313-66
6) तत्रैव, 01-19
7) ना.शा. 18-48
8) प.म. 2.3.17
9) द्रष्टव्य, विभाषापदार्थविचारः, पृ. 23
10) वै.सि.कौ. वा- 3280
11) सत् फट् क्किञ्चिररात्राय विभाषेति नचेत् पुनः ।
आः शप्समुपजोषं खोरठावाडां स्वरादयः ।।ग. 1-9
12) पा.अ.- 6.1.87
13) तत्रैव- 4.1.44
14) तत्रैव- 2.3.35